गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।शकुन्तः (कपिञ्जलरूपीन्द्रः)। त्रिष्टुप्

**कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्।**

**सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत्॥ २.०४२.०१**

कनिक्रदत्- शब्दायमानः। जनुषम्- जनिष्यमानमर्थम्। प्रब्रुवाणः- प्रकर्षेण वदन्। अरिता- कर्णधारः। नावम्- प्लवम्। इव। वाचम्। इयर्ति- प्रेरयति। शकुने- पक्षिन्। सुमङ्गळः- कल्याणः। च। भवासि- भवसि। त्वा- त्वाम्। विश्व्या- सर्वः। अभिभा- अभिभविता। मा विदत्- मा लम्भयतु ॥१॥

**मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान्वीरो अस्ता।**

**पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलो भद्रवादी वदेह॥ २.०४२.०२**

त्वा- त्वाम्। श्येनः- प्रबलः पक्षिविशेषः। मा उद्वधीत्- मा बाधेत। मा सुपर्णः। त्वा- त्वाम्। इषुमान्- आयुधयुक्तः। वीरः। अस्ता- क्षेप्ता। मा विदत्- मा लम्भयतु। उपाधिभ्यो विमोचनं मुक्तिर्या क्रमशः समाधिभिः साध्यते। समाधयोपि मुक्तय एव। निर्बीजसमाधिरात्यन्तिकी मुक्तिर्योगशास्त्रे। एकस्मात्समाधेरन्यसमाधिः क्रमशः साध्यते। अत्राक्रमतस्तरणमापत्करम्। उत्तरोत्तरसमाधावाकांक्षायां सद्य आगन्तुकसमाधेर्हानमापत्यन्तं भवति। इदमेव प्रतीकभाषयात्रोच्यते। सुपर्णश्येनादयो महासमाधयः। अत्र यः पक्षी प्रोच्यते स सद्य आगन्तुकसमाधिः। श्येनः सुपर्णो वैनं मा लम्भयत्वित्यस्यार्थोयमेव। क्रमशः सद्य आगन्तुकसमाधिं महासमाधयो मा गिरन्तु। उत्तरोत्तरसमाधिष्वाकांक्षायां क्रमशः सद्य आगन्तुकसमाधित्यागयत्नो मा भवतु। क्रमशो यद्भवति तद्भवत्वित्यर्थः। मा नो अतिख्य आ

Dr. Rangan ji

WEBOLIM

गहीत्यादिश्रुतिषु च इदमेवोच्यते। पित्र्यां प्रदिशमनु कनिक्रदत्- पितृपैतामहोपदिष्टदिशोपदिशति।

सुमङ्गळः- कल्याणः। भद्रवादी- कल्याणवादी। इह- अत्र। भव ॥२॥

**अव॑ क्रन्द दक्षि॒ण॒तो गृ॒हाणां॑ सु॒म॒ङ्गलो॑ भद्रवा॒दी श॑कुन्ते।**

**मा न॑ः स्ते॒न ई॑शत॒ माघशं॑सो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीरा॑ः॥ २.०४२.०३**

शकुन्ते। सुमङ्गळः- कल्याणः। भद्रवादी- क्षेमवादी सन्। गृहाणाम्- अस्मत्सदनानाम्। दक्षिणतः। अव क्रन्द- शब्दय। नः- अस्मान्। स्तेनः- दस्युः। मा ईशत- स्वामित्त्वं कुरुत। अघशंसः- पापशंसी मा ईशत। सुवीराः- शोभनवीर्यसम्पन्नाः सन्तः। विदथे- यज्ञे। बृहत्- महत्। वदेम- ब्रवाम ॥३॥

४३

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।शकुन्तः(= कपिञ्जलरूपीन्द्रः)। जगती, २ अतिशक्करी अष्टिर्वा

**प्र॒द॒क्षि॒णिद॒भि गृ॑णन्ति का॒रवो॒ वयो॒ वद॑न्त ऋतु॒था श॒कुन्त॑यः।**

**उ॒भे वाचौ॑ वदति साम॒गा इ॑व गाय॒त्रं च॒ त्रैष्टु॑भं॒ चानु॑ राजति॥ २.०४३.०१**

शकुन्तयः। ऋतुथा- काले। वयः- हव्यपावकं मन्त्रम्। वदन्तः- ब्रुवन्तः। कारवः- कर्मठाः। प्रदक्षिणित्- प्रदक्षिणं कुर्वन्तः। अभि गृणन्ति- अभितः स्तुवन्ति। सामगा इव- सामगानपरायणा इव। गायत्रं च त्रैष्टुभं च उभे वाचौ। वदति- शकुन्तिर्ब्रुवति। अनु- तद्गानमनु। राजति- प्रकाशते च ॥१॥

**उ॒द्गा॒तेव॑ शकु॒ने साम॑ गायसि ब्रह्मपु॒त्र इ॒व सव॑नेषु शंससि।**

**वृषे॑व वा॒जी शिशु॑मतीर॒पीत्या॑ स॒र्वतो॑ नः शकुने भ॒द्रमा व॑द**

**वि॒श्वतो॑ नः शकु॒ने पुण्य॒मा व॑द॥ २.०४३.०२**

शकुने- पक्षिन्। उद्गातेव- सामगानपरायण इव। साम। गायसि- कीर्तयसि। ब्रह्मपुत्र इव- ब्राह्मण इव। सवनेषु- यज्ञेषु। शंससि- मन्त्रान् वदसि। वृषा- वर्षकः। वाजी- अश्वः। शिशुमतीः- वडवाः। अपीत्य- अभिगत्य। इव। सर्वतः। नः- अस्मभ्यम्। शकुने। भद्रम्- कल्याणम्। आ वद- आभिमुख्येन ब्रूहि। शकुने। विश्वतः- सर्वतः। पुण्यम्। आ वद ॥२॥

**आ॒वद॒ँस्त्वं श॑कुने भ॒द्रमा व॑द तू॒ष्णीमासी॑नः सु॒म॒तिं चि॑किद्धि नः।**

**यदु॒त्पत॒न्वद॑सि कर्क॒रिर्य॑था बृ॒हद्व॑देम वि॒दथे॑ सु॒वीरा॑ः॥ २.०४३.०३**

Dr. Rangaji

WEBOLIM

शकुने। त्वम्। आवदन्- ब्रुवन्। भद्रम्- कल्याणम्। आ वद- ब्रूहि। तूष्णीम्- मौनेन। आसीनः। नः- अस्माकम्। सुमतिम्- शोभनभावनम्। चिकिद्धि- बुध्यस्व। उत्पतन्। कर्करिः- हास्यदः। कर्कं हास्यं राति ददातीति कर्करिः। यथा तथा। वदसि- ब्रूषे ॥३॥

Dr. Ranganji

WEBOLIM